# Datta Prarthana Stotram

# દત્તપ્રાર્થનાસ્તોત્રમ્

## Document Information

Text title : Datta Prarthana Stotram

File name : dattaprArthanAstotram.itx

Category : dattatreya, deities_misc, vAsudevAnanda-sarasvatI

Location : doc_deities_misc

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

Datta Prarthana Stotram

# દત્તપ્રાર્થનાસ્તોત્રમ્

પ્રભો દેવદેવ પ્રભો દત્તદેવ । તારકોઽસ્માકમકહૃત્ત્વમેવ ॥

પ્રભો દેવ દેવ પ્રભો દત્તદેવ ॥ ધ્રુ ॥

એહિ કરુણાકરા પાહિ પરમેશ્વરા ।
ત્રાહિ ભવસાગરાદખિલદેવ ॥

એહિ લઘુ સન્મતે એહિ લઘુ સત્પતે ।
દેહિ લઘુ સદ્વતે શુદ્ધભાવમ્ ॥ ૧॥

ત્વમસિ દુરિતાપહા ત્વમસિ ભવતાપહા ।
ત્વમસિ કુમતાપહા સર્વદેવ ॥

ત્વમસિ હિતકારકસ્ત્વમસિ ભયવારક-।
સ્ત્વમસિ ભવતારકઃ સાધુદેવ ॥ ૨॥

ત્વમસિ મમ દૈવતં ત્વમસિ મમ જીવિતમ્ ।
ત્વમસિ મમ સકલહિતજાતમેતત્ ॥

ત્વમસિ મમ ચાલકસ્ત્વમસિ મમ પાલક-
સ્ત્વમસિ મમ તારકો દત્તદેવ ॥ ૩॥

આર્દ્રમતિકોમલં સાન્દ્રકરુણાલયમ્ ।
સાન્દ્રચિતિસોજ્વલં સુકૃતશીલમ્ ॥

હૃદયમિહ વિશ્રુતં સદયમજ તે મતમ્ ।
સુનય સહસા દ્રુતં ભવતુ દેવ ॥ ૪॥

દેવ ભવદાવતસ્તીવ્રતરતાપતઃ ।
દત્ત સન્તાપિતં માઽભિષિઞ્ચ ॥

સત્કટાક્ષામૃતૈઃ પૂજિતાઙ્ઘ્રેઽમૃતૈઃ
સંસ્તુતાસ્તાનૃતૈઃ પાહિ દેવ ॥ ૫॥

ઘોરઘોરાન્ધકારાવૃતે સદ્ગતેઽગાધસંસારકૂપે દુરન્તે ।
પતિતમતિમન્યુના ઘોરકાલાહિના
સંવૃતં મોચયાશ્વોવ માઽવ ॥ ૬॥

ઘોરભવસાગરે સર્વથા દુષ્કરેઽસ્મિન્નનાદાવનન્તેઽનપારે ।
પતિતમિહ દુઃસ્થિતં કર્મવાતાહતં
પ્રોદ્ધરાર્તં પ્રભો માં સુભાવ ॥ ૭॥

મત્સમઃ પાપકૃત્ત્વત્સમઃ પાપહૃત્ ।
નાસ્ત્યપર ઈશ્વર પ્રાર્થયે તત્ ॥

યત્ત્વમિચ્છસિ વિભો તત્કુરુષ્વ પ્રભો ।
વાસુદેવાર્થિત શ્રીશ દેવ ॥ ૮॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં શ્રીદત્તાત્રેયપ્રાર્થનાસ્તોત્રં સમ્પૂર્ણમ્ ।

---

*Datta Prarthana Stotram*

pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*